# Adibuddhadvadashaka Stotram

# आदिबुद्धद्वादशकस्तोत्रम्

## Document Information

Text title : Adibuddhadvadashaka Stotram

File name : AdibuddhadvAdashakastotram.itx

Category : vishhnu, dashAvatAra, viShNu, buddha, dvAdasha, stotra

Location : doc_vishhnu

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# आदिबुद्धद्वादशकस्तोत्रम्

ॐ नम आदिबुद्धाय ।
नमस्ते बुद्धरूपाय धर्मरूपाय ते नमः ।
नमस्ते सङ्घरूपाय पञ्चबुद्धात्मने नमः ॥ १॥

पृथ्वीरूपायाब्रूपाय तेजोरूपाय ते नमः ।
नमस्ते वायुरूपायाकाशरूपाय ते नमः ॥ २॥

ब्रह्मणेसत्त्वरूपाय रजोरूपाय विष्णवे ।
तमोरूपमहेशाय ज्ञानरूपाय ते नमः ॥ ३॥

प्रज्ञोपायात्मरूपाय गुह्यरूपाय ते नमः ।
दिग्रूपलोकपालाय विश्वरूपाय ते नमः ॥ ४॥

चक्षूरूपाय कर्णाय घ्राणरूपाय जिह्वके ।
कायरूपाय श्रीधर्मरूपाय मनसे नमः ॥ ५॥

नमस्ते रूपरूपाय रसरूपाय ते नमः ।
गन्धरूपशब्दरूपस्पर्शरूपाय ते नमः ॥ ६॥

धर्मरूपधारकाय षडिन्द्रियात्मने नमः ।
मांसास्थिमेदमज्जानां सङ्घातरूपिणे नमः ॥ ७॥

रूपाय जङ्गमानां ते स्थावराणां च मुर्तये ।
तिरश्चां मोहरूपाय रूपायाश्चर्यमूर्तये ॥ ८॥

सृष्टिकर्त्रे जन्मरूप कालरूपाय मृत्यवे ।
भव्याय वृद्धरूपाय बालाय ते नमो नमः ॥ ९॥

प्राणापानसमानोदानव्यानमूर्तये नमः ।
वर्णापवर्णरूपाय भोक्रे तन्मूर्तये नमः ॥ १०॥

दिनरूपाय सूर्याय चन्द्राय रात्रिरूपिणे ।

तिथिरूपाय नक्षत्रयोगवारादिमुर्तये ॥ ११॥

बाह्याभ्यन्तररूपाय लौकिकाय नमोनमः ।
नैर्वाणाय नमस्तुभ्यं बहुरूपाय ते नमः ॥ १२॥

आदिबुद्धद्वादशकं पुण्यं प्रातः पठिष्यति ।
यदिच्छति लभेन्नूनं मनुजो नित्यनिश्चयः ॥ १३॥

इति श्रीमञ्जुश्रीकृतमादिबुद्धद्वादशकस्तोत्रं सम्पूर्णम् ॥

*Adibuddhadvadashaka Stotram*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*